# इन्द्राक्षी स्तोत्रम्

ध्यानम्-
नेत्राणां दशभिश्शतैः परिवृतां अत्युग्र चर्माम्बरां
हेमाभां महतीं विलम्बित शिखां आमुक्त केशान्विताम् ।
घण्टा मण्डित पादपद्म युगलां नागेन्द्र कुम्भस्तनीम्
इन्द्राक्षीं परिचिन्तयामि मनसा कल्पोक्त सिद्धिप्रदाम् ॥

इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्र द्वयान्विताम् ।
वामहस्ते वज्रधरां दक्षिणेन वरप्रदाम् ॥

इन्द्राक्षीं सहस्रयुवतीं नानालङ्कार भूषिताम् ।
प्रसन्न वदनाम्भोजां अप्सरोगण सेविताम् ॥

द्विभुजां सौम्य वदनां पाशाङ्कुशधरां पराम् ।
त्रैलोक्य मोहिनीं देवीं इन्द्राक्षी नाम कीर्तिताम् ॥

पीताम्बरां वज्रधरैक हस्तां नानाविधालङ्करणां प्रसन्नाम् ।
त्वामप्सरस्सेवित पादपद्मां इन्द्राक्षि वन्दे शिव धर्मपत्नीम् ॥

इन्द्रादिभिः सुरैर्वन्द्यां वन्दे शङ्कर वल्लभाम् ।
एवं ध्यात्वा महादेवीं जपेत् सर्वार्थ सिद्धये ॥

वज्रिणी पूर्वतः पातु चाग्नेय्यां परमेश्वरी ।
दण्डिनी दक्षिणे पातु नैरृत्यां पातु खड्गिनी ॥ १॥

पश्चिमे पाशधारी च ध्वजस्था वायु दिङ्मुखे ।
कौमोदकी तथोदीच्यां पात्वैशान्यां महेश्वरी ॥ २॥

उर्ध्वदेशे पद्मिनी मां अधस्तात् पातु वैष्णवी ।
एवं दश दिशो रक्षेत् सर्वदा भुवनेश्वरी ॥ ३॥

इन्द्र उवाच ।
इन्द्राक्षी नाम सा देवी दैवतैः समुदाहृता ।
गौरी शाकम्भरी देवी दुर्गा नाम्नीति विश्रुता ॥ ४॥

नित्यानन्दा निराहारा निष्कलायै नमोऽस्तु ते ।
कात्यायनी महादेवी चन्द्रघण्टा महातपाः ॥ ५॥

सावित्री सा च गायत्री ब्रह्माणी ब्रह्मवादिनी ।
नारायणी भद्रकाली रुद्राणी कृष्णपिङ्गला ॥ ६॥

अग्निज्वाला रौद्रमुखी कालरात्रि स्तपस्विनी ।
मेघस्श्यामा सहस्राक्षी विकटाङ्गी जडोदरी ॥ ७॥

महोदरी मुक्तकेशी घोररूपा महाबला ।
अजिता भद्रदानन्ता रोगहर्त्री शिवप्रदा ॥ ८॥

शिवदूती कराली च प्रत्यक्ष परमेश्वरी ।
इन्द्राणी इन्द्ररूपा च इन्द्रशक्तिः परायणा ॥ ९॥

सदा सम्मोहिनी देवी सुन्दरी भुवनेश्वरी ।
एकाक्षरी परब्रह्म स्थूल सूक्ष्म प्रवर्धिनी ॥ १०॥

रक्षाकरी रक्तदन्ता रक्तमाल्याम्बरा परा ।
महिषासुर हन्त्री च चामुण्डा खड्ग धारिणी ॥ ११॥

वाराही नारसिंही च भीमा भैरव नादिनी ।
श्रुतिः स्मृति धृतिर्मेधा विद्या लक्ष्मीः सरस्वती ॥ १२॥

अनन्ता विजयापर्णा मानस्तो कापराजिता ।
भवानी पार्वती दुर्गा हैमव त्यम्बिका शिवा ॥ १३॥

शिवा भवानी रुद्राणी शङ्करार्ध शरीरिणी ।
ऐरावत गजारूढा वज्रहस्ता वरप्रदा ॥ १४॥

नित्या सकल कल्याणी सर्वैश्वर्य प्रदायिनी ।
दाक्षायणी पद्महस्ता भारती सर्वमङ्गला ॥ १५॥

कल्याणी जननी दुर्गा सर्वदुर्ग विनाशिनी ।
इन्द्राक्षी सर्वभूतेशी सर्वरूपा मनोन्मनी ॥ १६॥

महिषमस्तक नृत्य विनोदन स्फुटरणन्मणि नूपुर पादुका ।
जनन रक्षण मोक्षविधायिनी जयतु शुम्भ निशुम्भ निषूदिनी ॥ १७॥

सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तुते ॥ १८॥

ॐ ह्रीं श्रीं इन्द्राक्ष्यै नमः। ॐ नमो भगवति, इन्द्राक्षि,
सर्वजन सम्मोहिनि, कालरात्रि, नारसिंहि, सर्वशत्रु संहारिणि ।
अनले, अभये, अजिते, अपराजिते,
महासिंह वाहिनि, महिषासुर मर्दिनि ।
हन हन, मर्दय मर्दय, मारय मारय, शोषय
शोषय, दाहय दाहय, महाग्रहान् संहर संहर ॥ १९॥

यक्षग्रह राक्षसग्रह स्कन्धग्रह विनायकग्रह बालग्रह कुमारग्रह
भूतग्रह प्रेतग्रह पिशाचग्रहादीन् मर्दय मर्दय ॥ २०॥

भूतज्वर प्रेतज्वर पिशाचज्वरान् संहर संहर ।
धूमभूतान् सन्द्रावय सन्द्रावय ।
शिरश्शूल कटिशूलाङ्गशूल पार्श्वशूल
पाण्डु रोगादीन् संहर संहर ॥ २१॥

य-र-ल-व-श-ष-स-ह, सर्वग्रहान् तापय
तापय, संहर संहर, छेदय छेदय
ह्रां ह्रीं ह्रूं फट् स्वाहा ॥ २२॥

गुह्याति गुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्मयि स्थिरा ॥ २३॥

फलश्रुतिः
नारायण उवाच ॥

एवं नामवरै र्देवी स्तुता शक्रेण धीमता ।
आयुरारोग्य मैश्वर्यं अपमृत्यु भयापहम् ॥ १॥

वरं प्रादान्महेन्द्राय देवराज्यं च शाश्वतम् ।
इन्द्रस्तोत्र मिदं पुण्यं महदैश्वर्य कारणम् ॥ २ ॥

क्षयापस्मार कुष्ठादि तापज्वर निवारणम् ।
चोर व्याघ्र भयारिष्ठ वैष्णव ज्वर वारणम् ॥ ३॥

माहेश्वर महामारी सर्वज्वर निवारणम् ।
शीत पैत्तक वातादि सर्वरोग निवारणम् ॥ ४॥

शतमावर्तयेद्यस्तु मुच्यते व्याधि बन्धनात् ।
आवर्तन सहस्रात्तु लभते वाञ्छितं फलम् ॥ ५॥

राजानं च समाप्नोति इन्द्राक्षीं नात्र संशय ।
नाभिमात्रे जले स्थित्वा सहस्र परिसंख्यया ॥ ६॥

जपेत् स्तोत्रमिदं मन्त्रं वाचासिद्धि र्भवेद्ध्रुवम् ।
सायं प्रातः पठेन्नित्यं षण्मासैः सिद्धि रुच्यते ॥ ७॥

संवत्सर मुपाश्रित्य सर्वकामार्थ सिद्धये ।
अनेन विधिना भक्त्या मन्त्रसिद्धिः प्रजायते ॥ ८॥

सन्तुष्टा च भवेद्देवी प्रत्यक्षा सम्प्रजायते ।
अष्टम्यां च चतुर्दश्यां इदं स्तोत्रं पठेन्नरः ॥ ९॥

धावतस्तस्य नश्यन्ति विघ्न संख्या न संशयः ।
कारागृहे यदा बद्धो मध्यरात्रे तदा जपेत् ॥ १०॥

दिवसत्रय मात्रेण मुच्यते नात्र संशयः ।
सकामो जपते स्तोत्रं मन्त्रपूजा विचारतः ॥ ११॥

पञ्चाधिकै र्दशादित्यैर् इयं सिद्धिस्तु जायते ।
रक्तपुष्पै रक्तवस्त्रै रक्तचन्दन चर्चितैः ॥ १२॥

धूपदीपैश्च नैवेद्यैः प्रसन्ना भगवती भवेत् ।
एवं सम्पूज्य इन्द्राक्षीं इन्द्रेण परमात्मना ॥ १३॥

वरं लब्धं दितेः पुत्रा भगवत्याः प्रसादतः ।
एतत् स्तोत्रं महापुण्यं जप्य मायुष्य वर्धनम् ॥ १४॥

ज्वरातिसार रोगाणां अपमृत्यो र्हराय च ।
द्विजैर्नित्य मिदं जप्यं भाग्यारोग्यं अभीप्सुभिः ॥ १५॥

॥ इति इन्द्राक्षी स्तोत्रं सम्पूर्णम् ॥